# नायं छागः

## ( प्रहसनम् )

**( ततः प्रविशति स्कन्धे छागं वहन् देवदत्तः )**

**देवदत्तः** – अहो ! स्वस्थः शोभनोऽयं छागः । ग्रामं नीत्वा सपरिवारोऽहं दिनत्रयं यावद् एतस्य सुललितं मांसं भक्षयामि । (इत्येकतो निष्क्रान्तः) (ततः एकस्मिन् कोणे स्थितास्त्रयो धूर्ता एतद् दृष्ट्वा परस्परं मन्त्रयन्ति ।)

**प्रथमः** – (मन्दस्वरेण) मित्र । चिरात् छागमांसं न प्राप्तम् । अद्यायं वराको दृश्यते । एतस्माच्छागग्रहणाय कश्चिद् उपायः करणीयः ।

**द्वितीयः** – उपायः परमः सरलोऽस्ति ।

**तृतीयः** – कीदृशः ? कीदृशः ?

**द्वितीयः** – (उभयोःकर्णे किमपि कथयति ।)

**प्रथमः** – (विहसन्) युवाम् अग्रे वेगेन गच्छतम् । अहमत्र तेन सह आलपामि ।

(द्वितीयतृतीयौ गच्छतः)

(ततः प्रविशति स्कन्धे छागं वहन् देवदत्तः)

**देवदत्तः** – (छागं प्रति) अयि भोः ! अधुना त्वं मम स्कन्धे तिष्ठसि, श्वः मम उदरे स्थास्यसि ।

**प्रथमः** – भो ब्राह्मण ! धिक् त्वाम् । कथं कुक्कुरमेनं स्कन्धे वहसि ?

**देवदत्तः** – (तं साशंकं पश्यन्) नायं कुक्कुरः, छागोऽयं छागः ।

**प्रथमः** – (विहसन्) पश्यन्तु भोः ! अयं मूर्खः कुक्कुरमेव छागं मनुते ।

**देवदत्तः** – त्वमेव मूर्खोऽसि । अयं मे छागोऽस्ति ।

**प्रथमः** – गच्छ मूर्ख ! कुक्कुरमेव खादिष्यसि, चाण्डालो भविष्यसि । सावधानेन पश्य, कुक्कुरोऽयमिति ।

**देवदत्तः** – गच्छ, गच्छ । मां वञ्चयसि । नाहं तव शृणोमि ।

(उभौ निष्क्रान्तौ)

(ततः प्रविशति द्वितीयः)

**द्वितीयः** – (आगच्छन्तं देवदत्तं विलोक्य साश्चर्यं विलोकयन्) पश्चन्तु भोः ! अयं ब्राह्मणः कुक्कुरं वहति । भोः ? निक्षिप एनम् । धिक् त्वाम् ।

**देवदत्तः** – नायं कुक्कुरः, छागोऽयम् ।

**द्वितीयः** – तव दृष्टिदोषोऽयम् यत् कुक्कुरं छागं भणसि ।

**देवदत्तः** – (स्वगतम्) अहो पूर्वमपि तेनोक्तम्, अधुना पुनरप्ययं कथयति । पश्यामि तावत् । (छागं स्कन्धादवतार्य निपुणं निरीक्ष्य) नहि–नहि । नायं कुक्कुरः, छाग एवायम् ।

**द्वितीयः** – धिग् धिक् । परित्यज कुक्कुरम् ।

**देवदत्तः** – अरे मूर्ख ! किं प्रलपसि ? नायं कुक्कुरः छागोऽयं मे छागः । छागं स्कन्धे नीत्वा अग्रे सरति ।

**द्वितीयः** – गच्छ, गच्छ । कुक्कुरं खादिष्यसि ।

(इति निष्कान्तः)

(देवदत्तः किञ्चिद् दूरं गच्छति । ततः प्रविशति तृतीयः)

**तृतीयः** – (उच्चैर्विहसन्) पश्यन्तु भोः । ब्राह्मणोऽयं कुक्कुरं नयति ।

**देवदत्तः** – नायं कुक्कुरः, छागोऽयम् ।

©BSTBPC NOT TO BE PUBLISHED

**तृतीयः** - अरे मूर्ख ! केनापि वञ्चितोऽसि । कुक्कुरोऽयं, परित्यज एनम् । तव पितुः शपथं कृत्वा कथयामि, नायं छागः, कुक्कुरोऽयम् ।

**देवदतः** - (विस्मितः सन् स्वगतम्) हन्त ! सर्वे कथयन्ति कुक्कुरोऽयमिति । सत्यम्, ममैव मतिभ्रमोऽस्ति ।

**तृतीयः** - भो ब्राह्मण ! किं विचारयसि ? शीघ्रं परित्यज एनम् । नद्यां स्नात्वा गंगाजलेन शरीरं शोधय ।

**देवदतः** - सत्यम् भ्रातः । मम मतिभ्रमो जातः परित्यजामि एनम् । (इति छागं परित्यज्य घृणापूर्वकं निष्क्रान्तः ।)

(ततः प्रथमः द्वितीयश्च प्रविशतः)

**तृतीयः** - (सानन्दं छागं गृहीत्वा) सुदिनमद्य । शोभनोऽयं छागो लब्धः ।

**प्रथमः** - अस्माकं मन्त्रणा सफला जाता ।

**द्वितीयः** - तत्र कः सन्देहः, क्षिप्रं निस्सरामः ।

(इति निष्क्रान्ताःसर्वे)

# प्रयाणगीतम्

प्रचल्यतां प्रचल्यतां स्वमातृभूः सुरक्ष्यताम् ।
स्वराष्ट्रवीरसैनिकाः स्वराष्ट्रभूः सुरक्ष्यताम् ।। 1 ।।

स्ववक्षसां पराक्रमैः प्रबुद्धयुद्धसङ्क्रमैः ।
वामदक्षवामदक्ष- पूर्वकं पदक्रमैः ।। 2 ।।

पदं पदं सहैव नैव कर्हिचित् पृथग् भवेत् ।
प्रचण्डशत्रुमण्डलेऽपि साहसं न वः पतेत् ।। 3 ।।

त्रिशङ्कटं सुसङ्कटं च नैव मानसं धमेत् ।
सुवर्णराशिवीरतापि वःपुरः स्वयं नमेत् ।। 4 ।।

न लोभतो न मोहतोऽपि मार्गभ्रष्टता भवेत् ।
समस्तविश्वमण्डले बले बलिष्ठता भवेत् ।। 5 ।।

स्वमार्गमध्य उत्थितः स पर्वतो निपात्यताम् ।
सुगर्जतो रिपो रदावली क्षणे निशात्यताम् ।। 6 ।।

सुगर्जितोर्जितेन वो रिपुः पराजितो भवेत् ।
स्वरक्षणं न लक्षयन् स्वयं व आश्रितो भवेत् ।। 7 ।।

स्थले जले नभस्तले रिपुर्न कोऽपि मुच्यताम् ।
अरे, भुशुण्डिमण्डिता पुरोऽन्तकोऽपि भक्ष्यताम् ।। 8 ।।

प्रदायतप्तलोहितानि मातृभूः सुरक्ष्यताम् ।
स्वमातृदुग्धगौरवं समुज्ज्वलं विधीयताम् ।। 9 ।।

©BSTBPC
NOT TO BE PUBLISHED

# महात्मा गान्धी

अस्यां वसुन्धरायां ये अलौकिकशक्तिसम्पन्ना: महापुरुषा: अवतरन्ति ते ईश्वरस्य अंशा: भवन्ति। देवस्य इच्छया ते पृथिव्याम् आयान्ति कार्याणि कृत्वा पुनरावर्त्तन्ते । वाल्मीकि:, व्यास:, बुद्धो, महावीर:, शङ्कर:, चैतन्य: एवं चान्ये महामानवा: ईश्वरस्य अंशभूता: येषां नामस्मरणमात्रेण अस्माकं मस्तकं श्रद्धया अवनतं किन्तु गौरवेण समुन्नतं भवति । एष्वेव महापुरुषेषु विश्वाख्यातस्य महात्मन: गान्धी महोदयस्यापि गणना विद्यते ।

अस्य महोदयस्य जन्म गुर्जरप्रान्तस्य 1869 तमे वर्षे एकस्मिन् वणिग्वंशे पोरबन्दरनामके स्थाने अभवत् । अस्य पिता कर्मचन्दगांधी राजकोटराजस्य प्रधानामात्य आसीत् । अस्य विवाह: त्रयोदशे एव वर्षे कस्तूरबानाम्न्या कन्यया सह अभूत् । विवाहोपरि मैट्रिकुलेशनं कृत्वा वैरिस्टरी शिक्षा ग्रहणाय आंग्लदेशं गतवान् । तत्र चतुर्षु वर्षेषु इमां शिक्षां समाप्य पुन: स्वदेशमागतवान् । अत्र राजकोटनगरे च न्यायालये प्राड्विवादव्यवसायम् आरब्धवान् । इदं कार्यं कुर्वन् एकदा अभियोगमादाय अफ्रीकादेशमगच्छत् । तत्र ये भारतीया: पूर्वत: एव तत्रासन् तेषां भारतीयानां दशां विलोक्य महात्मन: हृदये अतीव दु:खमभवत् । "डरवन" नगरस्य न्यायालये यदा ते भारतीयवेषानुसारं शिरसि उष्णीषं बद्हवा यदा अगच्छत् तदा तत्रत्येन न्यायाधीशेन स नितान्तम् अपमानितु: उष्णीषस्य अवतारणाय चाज्ञा पित:। एतदनन्तरं स्वकीयं वाक्कीलकार्यं परित्यज्य तत्रत्यभारतीयानां दशापरिवर्तनाय महत् आन्दोलनं चालितवान् । अनेन कार्येण तत्रत्या: भारतीया: संघटिता: भूतवन्त: । तदनन्तरं 1894 तमे वर्षे नेटाल इण्डियन कांग्रेस नामक संस्थाया: स्थापना अभवत् । अनया संस्थया तत्रत्यानां भारतीयानां जीवनस्य सर्वेषु क्षेत्रेषु क्रान्ति: कृता महात्मन: गान्धिमहोदस्य नेतृत्वे । राजनीतौ प्रवेशस्य महात्मन: आदिमकाल: आसीत् ।

यदा महात्मा गान्धिमहोदय: अफ्रीकादेशे आन्दोलनं कुर्वाण आसीत् तदा भारते अपि स्वराज्यावाप्तये कांग्रेससभा कार्यं करोति स्म । 1919 तमे वर्षे अफ्रीकात: निवृत्त्य कांग्रेससभायां सम्मिलितोऽभवत् । 1920 तमे असहयोगान्दोलनं चालितवान् । एतस्यैव नेतृत्वे 1930 तमे वत्सरे च कांग्रेससभया पूर्णस्वतन्त्रताया: प्रस्ताव: कृत: अङ्गीकृत:। तदनुसारं च देशे पूर्वतोऽपि अधि-

कोत्साहेन असहयोगादि आन्दोलनं चलितुमारब्धम् । 1932 तमे वत्सरे आङ्गलशासकैः हरिजनानां कृते पृथक् निर्वाचनस्य प्रस्तावस्य विरोधे महात्मना महोदयेन आमरणमनशनं प्रारब्धम् । तेन शासकाः पृथक् निर्वाचनस्य प्रस्तावं परावर्तितवन्तः । 1942 तमे वर्षे, भारतं त्यजत, (भारत-छोड़ो) नाम्ना अन्तिममान्दोलनं चालितं गान्धिमहानुभावेन, यस्मात् सार्द्धवर्षद्वयं कारागारकष्टं कृत्वा अपि 1947 तमे वर्षे पूर्णस्वतन्त्रतां लब्धवान्, अनेकशतवर्षेभ्यश्च पराधीनं भारतं पराधीनताया उन्मोचितवान् ।

सर्वे जानन्ति यत् स्वन्त्रताप्राप्तिकाले देशस्य हिन्दुस्तान-पाकिस्तान-रूपेण द्विधा विभाजनं जातम् । विभाजनात् पूर्वं तथा विभाजनादनन्तरं कलिकत्तानगरे नोआखाली नगरे च हिन्दु-मुस्लिम-सम्प्रदाये भयानकरूपेण उपद्रवाः आरब्धाः। तस्य स्फुलिङ्गाश्च सम्पूर्णे देशे वैरविद्वेषानलं प्रज्वालितवन्तः। इदानीमपि उपद्रवपूर्णे काले शान्तिस्थापनायै महत्प्रयासं कृतवान् । अन्ते च अनेन शान्तिप्रयासेन सार्द्धमेव 1948 तमे वत्सरे जनवरी मासस्य त्रिंशत्तारिकायां प्रार्थनासभां गच्छन् एकेन यवनोत्पातपीडितेन गान्धिमहोदयस्य च यवनपक्षपातरुष्टेन "नाथूरामगोडसे" नाम्ना युवकेन गुलिकया हतः सन् पाञ्चभौतिकं शरीरं परित्यज्य चरमां शान्तिं लेभे । यथोक्तम्-

आसीत् राष्ट्रपतिर्योग्यो गान्धी राष्ट्रपिता हि सः।

# भारतीय-प्रजातन्त्रम्

विशाला-नगर्यां पुरा लिच्छवीनां
विशाले तमःपूरिते विश्वभागे ।
अखण्डं नवं ज्योतिराविर्बभूव
प्रजातन्त्रमेतज्जयेद् भारतीयम् ।। 1 ।।

भुवः शासने रामकृष्णादयोऽपि
जनानां विचारं सदा मानयन्तः ।
प्रजापालने तत्परास्ते बभूवु-
रिदानीं यशो गीयते भूतलेऽस्मिन् ।। 2 ।।

विजानन् प्रियां स्वामदुष्टां पवित्रां
प्रवादं प्रजायाः निशम्याकुलः सन् ।
शशाक क्व रामो गृहे रक्षितुं तां
स तत्याज बाष्पैः समं लोकनेता ।। 3 ।।

अरस्तुश्च रूसो च पाश्चात्त्यविज्ञा
मतं लोकतन्त्रे निजं व्यक्तवन्तः
अमीषान्तु मूलं श्रुतौ दर्शनीयं
तथा चेतसा सन्ततं चिन्तनीयम् ।। 4 ।।

©BSTBPC
NOT TO BE PUBLISHED

पुराणेषु तत्त्वं समाजे सुवादे
युगे श्रीमता व्यासदेवेन दिव्यम्।
प्रदिष्टं पुरा सर्वदेशे च काले
तदादर्शभूतं मतं मापनीयम् ।। 5 ।।

बुभुक्षा शमं प्राणिनां याति यावत्
सदा जानतीयं निजं तावदेव ।
प्रभूतं ततो नाभिमन्येत चौरः
स दण्ड्यो मतं व्यास एवं बभाषे ।। 6 ।।

प्रभा संस्कृतस्याखिले विश्वलोके
विकीर्णा यदा सर्वभाषाविभागे।
तथा प्रेरितैः भारतीशोधविज्ञैः
प्रणीतानि शास्त्राण्यनेकानि वाचः ।। 7 ।।

# संस्मरणम्

स्वातन्त्र्यसेनानीनामग्रगण्यः प्रधानदेशभक्तेषु अन्यतमः देशस्यास्माकं प्रथमः प्रधानमन्त्री पं० जवाहरलाल नेहरूः आसीत् । धन्योऽयं महापुरुषः यः पञ्चतत्त्वनिर्मितकायं देशाय समर्पयामास । उक्तमपि सत्यं भर्तृहरिणा –

**स्वयं न खादन्ति फलानि वृक्षाः**
**पिबन्ति नद्यः स्वयमेव नाम्भः ।**
**धाराधरो वर्षति नात्महेतोः,**
**परोपकाराय सतां विभूतयः ॥**

अन्यच्च

**यदि नित्यमनित्येन निर्मलं मलवाहिना ।**
**यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किम् ।**

महानुभावोऽयं बालान् प्रति अतीव स्नेहं करोति स्म । अतः बालाः तं ''चाचा नेहरूः'' इति कथयन्ति स्म । अस्य महोदयस्य जन्मदिनं चतुर्दशनवम्बरदिवसे बालदिवसरूपेण स्मर्यते ।

कदाचित् कस्मिंश्चित् वर्षे च चतुर्दशनवम्बरदिवसे महानुभावस्यावासस्थानेऽतीव जनसम्मर्दः आसीत् । शिशवः आयान्ति स्म अभिनन्दनञ्च कृतवन्तः आसन् । बालान् विलोक्य महोदयः आनन्दाब्धौ निमज्जितः। तदानीं सानन्देन बालाः कथयन्ति स्म ''चाचा नेहरू जिन्दाबाद''

एषां बालानां मध्यतः एका बालिका समायाता महोदयस्य सविधे सादरमुक्तवती च– भोः पितृव्य ! मह्यं ऑटोग्राफ (हस्ताक्षरं) दीयताम् । एवमुक्त्वा पितृव्याय एकां पुस्तिकां दत्तवती । महानुभावः सत्वरं पुस्तिकाम् उद्घाट्य स्वहस्ताक्षरमकरोत् । अस्मिन्नेव काले सा बालिका अकथयत्– पितृव्य ! न केवलं ऑटोग्राफं अपितु शुभकामनायाः संदेशमपि लिख्यताम् । नेहरूजीवः पुस्तिकां पुनः उद्घाट्य अलिखत्–न कदापि जीवने पराजयं स्वीकुरत इति हिन्द्यां लिखितवान् । काठिन्येष्वपि

हस। शुभकामनाभिः सहितमधः हस्ताक्षरं कृतवान् । नेहरूजीवः यदा बालिकायै हस्ताक्षर-पुस्तिकां दत्तवान् तदानीं बालिकायाः नेत्रयोः प्रसन्नतायाः दीप्तिरासीत् । सा हस्ताक्षर-पुस्तिकां विलोक्य पुनः उक्तवती तारिकापि लिख्यताम्। नेहरूजीवः स्मितवान् अकथयच्च देहि मे तारिकामपि लिखामि । एवममिधाय स पुस्तिकां नीतवान् तिथिमपि अलिखत् । बालिका प्रसन्ना भूत्वा धन्यवादमुक्तवती किञ्चित् विचिन्त्य च प्रोवाच- पितृव्य ! किमिदं, शुभकामनायाः वाक्यं हिन्द्यां, हस्ताक्षरम् आङ्गलभाषायां तारिकाञ्च उर्दूभाषायाम्। कथमेतादृशमकरोत्ः।

पितृव्यः महानुभावः हसन् अवोचत्-यादृशी इच्छा तत्र आसीत् तथैवाहमलिखम्। सर्वप्रथमं त्वया उक्तम् मह्यं ऑटोग्राफ दीयताम्। अतः आङ्गलभाषाया लिखितवान्। पुनश्च त्वया भणितं यत् शुभकामनायाः संदेशोऽपि लिख्यताम्-तदा अहं हिन्द्यां लिखितवान्। पुनः त्वया तारिका लिखितुं उक्तम्, तदाहं उर्दूभाषायामलिखम् । अतः स्मरणं कुरु सम्मिलितां भाषां वक्ष्यसि तदा सम्मिलितहस्ताक्षरमेव प्राप्स्यसिः। एवं श्रुत्वा बालिका किञ्चित् विचिन्त्य स्वमित्राणां मध्ये गत्वा उपविष्टा ।

# धर्मेषु भावः समानः समेषाम्

सम्प्रदाया वसन्तीह साकं समे
जैनबुद्धौ च सिक्खो मुदा वैष्णवः ।
शैवशाक्तौ च सम्मानितास्तन्वते
गौरवं भारतस्यानिशं पुष्कलम् ।। 1 ।।

चेष्टते नात्र कञ्चिज्जनं सज्जनः
कोऽपि वक्तुञ्च ते सम्प्रदायोऽस्ति कः ।
वेदिता द्रुह्यतीत्थं क्व कस्मै कदा
दृश्यते भूमिभागो विशेषो न वा ।। 2 ।।

वैदेशिकास्तुर्कशकौ च हूण-
आभीरमङ्गोल-युची-कुषाणः ।
यूनान-नीग्रोऽदृढ़पह्लवाश्च
समेऽत्र काले मिलिताः समाजे ।। 3 ।।

मोहम्मदीया अपि भारतेऽस्मिन्
तिष्ठन्ति रोजामधिमन्यमानाः ।
ख्रिस्तीय-धर्मं परिपालयन्तो
जना भुवं चाधिवसन्ति तुष्टाः ।। 4 ।।

दीपावली स्याद्विजया च होली
सत्पोङ्गलं वा गुडफ्रायडे वा ।
ईदं भवेद्वा बकरीदमेते
परस्परं मोदमिहाश्रयन्ते ।। 5 ।।

मन्दिरं मस्जिदं चर्चगेहं गुरोः
द्वारमेतत्समं यान्ति सर्वे जनाः ।
हिन्दवो मुस्लिमाः ख्रिस्तधर्मानुगाः
कोऽपि जिज्ञासते तत्र धर्मं न कम् ।। 6 ।।